International Journal of Sanskrit Research 2022; 8(3): 185-189

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(3): 185-189
© 2022 IJSR
www.anantaajournal.com
Received: 07-03-2022
Accepted: 05-04-2022

**Jayanta Mandal**
Research Scholar, PhD., University, Department of Sanskrit, Tilka Manjhi Bhagalpur University Bhagalpur, Bihar, India

**Corresponding Author:**
**Jayanta Mandal**
Research Scholar, PhD., University, Department of Sanskrit, Tilka Manjhi Bhagalpur University Bhagalpur, Bihar, India

# श्रीमद्भगवद्गीतादृष्ट्या सर्वभूतेषु समत्वदर्शनम् : एकम् अध्ययनम्

**जयन्तः मण्डलः**

**Abstract**
The Bhagavad Gita is abstract of Indian scriptures like the Vedas, the Upanishads and the Puranas. The Gita teaches various paths to gain self-knowledge on inner quiet. The article highlights how equality can be established in the universe. The study also tries to analyze how Bhagavad Gita supports to develop actual goal of our life. In the Divine Mother, Bhagavad Gita lord Krishna does not pass a judgment to anyone, nor does he give out a moral conduct of right and wrong. He doesn't impose any starchy dos and don'ts either. Krishna's message of Bhagavad Gita teaches man to free himself of his fetters, while being very much in samsara, realize the actual nature of his self and go beyond the human limitations of misery, matureness and death.

**Keywords:** The bhagavad gita, various paths, actual goal of life, life is a battlefield, equability

## प्रस्तवना

महर्षिवेदव्यासात्पूर्वं किमपि श्रीकृष्णकालिकशास्त्रं पुस्तकरूपेण न उपलब्धमासीत् | श्रुतज्ञानस्य इमां परम्परां भञ्जयन् महर्षिवेदव्यासेन पूर्वसञ्चितस्य भौतिकस्य तथाऽध्यात्मिकस्य च ज्ञानराशेः संकलनं कृत्वा श्रीमद्भगवद्गीता विरचिता | अन्ते स्वयमेव निर्णयं दत्तवान् यत् 'सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः'| सर्वेषां वेदानां प्राणभूता, उपनिषदां सारभूता खलु इयं गीता |सर्वासामुपनिषादां सारतत्त्वम् संकलितमस्ति श्रीमद्भगवद्गीतायाम् |

अतः सर्वा उपनिषदः गोरूपाः, तासां दोग्धा गोपालः, अर्जुनः वत्सस्वरूपः,सुधियः गीतामृतरसानां पातारः| भगवान् वेदव्यासः स्वकृतस्य गीताशास्त्रस्य स्तुतिं कृत्वा सगर्जमुद्घोषितवान्- "गीता सुगीता कर्त्तव्या" गीता सम्यगध्ययनानन्तरं हृदये धारणयोग्या | या पद्मनाभस्य भगवतः श्रीमुखानिसृता वाण्यस्ति पुनरन्यशास्त्राणां संग्रहस्य किं प्रयोजनम् अस्ति वा ?

> गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तारैः |
> या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृता ||[1]

**गीतायां मार्गाः** गीतायां कर्ममार्ग-ज्ञानमार्ग-उपासनामार्गभेदात् मार्गत्रयमुपलब्धम्| उपासना हि भक्तिरस्ति, भक्तो भवति उपासको | ज्ञाननिष्ठया योगनिष्ठया च शास्त्रविहितं

[1] महाभारतम्, भीष्मपर्व-43/1

कर्म भवति | ज्ञाननिष्ठायामपि कर्मणो विरोधो नास्ति | योगनिष्ठायां तु कर्मणः सम्पादनमेव मन्यते |

ज्ञाननिष्ठा तदा ज्ञेया सर्वज्ञो हि यदा भवेत् |
कर्मनिष्ठा तदा ज्ञेया यदा चित्तं प्रसीदति ||
भक्तिनिष्ठा तदा ज्ञेया यदा कृष्ण प्रसीदति |
निष्ठाभावे फलं तस्मान्नास्त्येवेति विनिश्चयः ||
**(श्रीमद्वल्लभाचार्यः)**

## मानवजीवनस्य मूलोद्देश्यम्

जीवनं किम् ?उच्यते 'जीवनं पुरुषार्थसाधनम्'इति|धर्मार्थ-काममोक्षा इति पुरुषार्थचतुष्टयम् | धर्मार्थं कामार्थम् अर्थोपार्जनार्थं मोक्षाय च सर्वत्रैव कर्मण आवश्यकता अनुभूयते| कामनापूर्वकं यत्कर्म क्रियतेयथाअग्निहोत्रादिकंतेन मानवःस्वर्गादिषु सुखमनुभवति परं मोक्षप्राप्तिः न सम्भवः | यदि हिंसादिकर्म करोति, परेषामहितं चिन्तयति तर्हि नरकादिषु दुःखं लभते | परं आत्मनः कामनां विहाय यत्कर्म क्रियते तत् निष्कामकर्म कथ्यते | तस्य विधानेन मानवाः मोक्षं प्राप्नुवन्ति |
अत : मानवाः सदैव स्वार्थभावनां त्यक्त्वा एव कर्माणि कुर्युः | फलस्पृहा न कर्त्तव्या | यतो हि कर्मणि एव मानवस्य अधिकारोऽस्ति न तु फलेषु | अतएव भगवता श्रीकृष्णेन भगवद्गीतायां सुस्पष्टं प्रतिपाद्यते यत्-

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन |
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ||[2]

यदियाथातथ्यतोविविच्यते तर्हि श्लोकोऽयं यजुर्वेदमूलकमेव | यजुर्वेदे प्रोच्यते यत्-

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः |
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ||[3]

कर्मफलप्राप्तेः अनेकानि प्रमाणानि शास्त्रेषु उपलभ्यन्ते | यथा - ' नहि कर्म किञ्चित् फलं यस्य न भुज्यते ' | कर्मणः प्राधान्यं विवित्य श्रीकृष्णेन गीतायास्तृतीयेऽध्याये निगदितमस्ति यत् –

कर्मणैव हि संसिद्धिमास्थिता जनकादयः |
लोकसङ्ङ्ग्रहमेवाऽपि सम्पश्यन् कर्तुमर्हसि||[4]

इत्यनेन सिद्ध्यति यत् कर्मणः शास्त्रीयो लौकिको वा समानाधिकारः | इतः परम् अष्टादशाऽध्याये यदा अर्जुनः सन्न्यासस्य विषये जिज्ञासते तत्र कथं वर्तितव्यमिति, श्रीकृष्णः मतान्तराणि प्रदर्शयन् तदुत्तरयति –

काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः |
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ||
त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः |
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ||[5]

अनयोः पद्ययोः अयम्भावोऽस्ति यत् - पण्डितजनाः काम्यानां कर्मणां त्यागमेव संन्यासमामनन्ति |

**सर्वे महापुरुषाः एकैव -** गीतायाः चतुर्थाध्यायस्य प्रथमश्लोके भगवान् श्रीकृष्ण उक्तवान् यत्-

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् |
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ||[6]

वस्तुतः एकः पूर्ण योगेश्वरोऽस्ति श्रीकृष्ण | स एकस्याव्यक्तस्याविनाशी भावस्य स्थितेरस्ति | अत्र सूर्य एको प्रतीकोऽस्ति | वास्तविक-प्रकाशदाता भगवान् एव | स्वयम् प्रकाशस्य स्ववशस्य परमेश्वरस्य निवासः हृदि वर्ततेऽस्मासु | मोहनिशायां निविष्टः मानवः योगविषये कदापि चिन्तनं न करोति |एतादृशः पुरुषः कोऽपि महापुरुषं यदा पश्यति तदा तस्य दर्शनमात्रेण, सान्निध्यलाभेन च योगस्य संस्काराः तस्मिन् संचरन्ति |तदुक्तं तुलसीदासेन-

जे चितये प्रभु, जिन प्रभु हेरे |
ते सब भये परम् पद जोगु ||[7]

जायमानाः सर्वे महापुरुषाः एकस्यैव विन्दुनः स्पर्शं कृत्वा एकमेव स्वरूपं लभन्ते | इदं पदं एकं लक्ष्यमस्ति | अनेके पुरुषा अस्मिन् मार्गे चलिष्यन्ति ; परन्तु यदा प्राप्स्यन्ति एकमेव पदं प्राप्स्यन्ति | शरीरं एकगृहमात्रं मन्यन्ते एतदवस्थाप्राप्तमहात्मनः | ते तु आत्मलक्ष्यं परमात्मानं निधायहृदि स्वरूपोन्मुखं अग्रेसराः भवन्ति | तेषामुपदेशेषु जातेः, पंक्तेः, वर्गभेदस्य, धनिनः निर्धनस्य च भेदाभेदः न भवति | किमधिकं तेषां दृष्टौ स्त्री - पुरुषयो भेदोऽपि न तिष्ठति-

2 श्रीमद्भगवद्गीता-2/47
3 यजुर्वेदः. 4/2
4 श्रीमद्भगवद्गीता-3/20
5 श्रीमद्भगवद्गीता-18/2-3
6 श्रीमद्भगवद्गीता-4/1
7 रामचरितमानस

सर्वस्य चाहं हृदि सन्निविष्टोमत्तःसमृतिर्ज्ञानमपोहनं च |
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहंम् ||
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च |
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ||[8]

महापुरुषाणां पश्चात् स्वसम्प्रदायं निर्माय तेषामनुयायिनः संकुचितविचाराः भवन्ति | सत्पुरुषस्य न च काचिज्जातिः न तु कश्चित् सम्प्रदायोऽस्ति | साधु तु साधुरेव | तं कस्यचित् सामाजिकसंगठनम् आकर्षयितुं न शक्नोति |
अतः समस्तभूमण्डले गृहीतजन्मनां साधूनां सम्मानं करणीयम्, कस्यचित् सम्प्रदायविशेषस्य प्रभाव - प्रभावितस्य तस्यालोचना न कर्त्तव्या, कुतोहि ते सन्ति निरपेक्षाः | संसारे कस्मिश्चित् स्थाने समुत्पन्नः साधुः न निन्दनीयः | यदि कश्चिदेवं करोति तदाऽसौ स्वान्तराले स्थितं परमात्मानं क्षीणयति, आत्मना परमात्मनो दूरीं वर्धयते, स्वयञ्च स्वां हानिं करोति |

**जीवनमस्माकं कुरुक्षत्रम् -** जीवनरथं कः चालयतीति उपनिषदि वर्णितमस्ति | उपनिषदि शरीरं रथम्, आत्मा रथी इत्युक्तमस्ति | अत्र आत्मा अर्जुन :, स च रथी विद्यते | आत्मानं रथिनं विद्धि शरीरं रथमेव तू |

बुद्धिं तु सारथिं विद्धि मन : प्रग्रहमेव च ||
इन्द्रियाणि हयान्याहुर्विषयान् तेषु गोचरान् ||[9]

जीवनकुरुक्षेत्रम् वर्तते | शरीरं प्राप्य जन्मनः अभवत् परं कुरु कुरु इति क्रियया आरम्भो भवति | एतदेव जीवनस्य कुरुक्षेत्रंम् | यदा बालकः जायते; सर्वप्रथमं रोदिति | रोदनतो जीवनं प्रारभते, जीवनस्य प्रवृत्तय: प्रारभन्ते | व्यक्तिः कर्म विना क्षणमपि स्थातुं न शक्नोति –

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् |
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैः गुणैः ||[10]

यावत् शरीरं तेन कर्मैव करणीयं भवति | चित्तमपि चिन्तयति एतत्करोमि, एतन्न करोमि इति |यावज्जीवनं तावत्कर्म कर्तव्यमेवेति | किन्तु गीतायाः सन्देशोऽस्ति - कर्मणा मुक्तिरावश्यकी नास्ति. कर्म बन्धनयुक्तमपि भवति | अपि च स्थातुमपि कठिनम् कर्म विना | कर्मबन्धनान्मुक्ति : कठिना नास्ति | कर्मबन्धात् कथं मुक्तिर्भवति इति युक्तिः कर्मयोगनाम्नि तृतीये अध्याये श्रीकृष्णेन प्रतिपादिता विद्यते-

कर्मण्येवाधिकारस्ते म फ़लेषु कदाचन |
म कर्मफ़लहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि ||[11]

स्वशक्तिं ज्ञात्वा कर्मणि प्रवृत्तिः ज्ञानमार्ग अस्ति | स्वाभिमानम् अहंकारं च विहाय इष्टोपरि निर्भरं भूत्वा कर्मणि प्रवृत्तिः निष्कामकर्ममार्ग | अतोक्तं तुलसीदासेन-
मोरे प्रौढ तनय सम ग्यानी|

बालक सुत सम दास अमानी ||
जनहि मोर बल निजबल ताही |
दुहु कहँ काम क्रोध रिपु आहि ||[12]

**गीतायां समत्वभावः -** गीतायां समत्वभावो विशेषरूपेण दृश्यते | यत्र समता तत्र सिद्धिर्भवति | ममतया समता भवति | सर्वत्रात्मीयभावः आयाति तदा समभावो भवति | श्रीमद्भगवद्गीता मानवानां माता विद्यते | अस्माकं हृदि एको बालको विद्यते, स अबोध: कर्तव्यज्ञानरहितः | "बालकः यदा अयोग्यं कर्म करोति तदा माता तं निषेधति, कदाचित् ताडयत्यपि, कदाचिद् बोधयति - "एवं न कर्तव्यमिति | तथैव गीता माता अस्माकं हृदि स्थितबालकं बोधयति –

क्लैब्यं मा स्म गम : पार्थ ! नैतत्त्वय्युपपद्यते |
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ||[13]

समदुःखसुखं मन्यमानः धीरः जनः इन्द्रियार्थसन्निकर्षोत्पन्नया व्यथया न क्लिष्टा भतति –

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ |
समदुःखसुखं धीरं सोऽमृततत्त्वाय कल्पते ||[14]

यत्र विषमता न स्यात् सः भावः समत्वमुच्यते |आसक्तिः अस्मान् विषमं करोति, फ़लकामना विषमतां जनयति |योगे अस्य समाधानमस्ति |सिद्ध्यसिद्ध्योः समभाव एव योगः | समत्वयोगे सिद्ध्यसिद्धी पुरुषं विचालयितुं न पारयतः |समत्वयोगे परमात्मना सह निष्कामकर्मयोगिनः मेलनं भवति | तदुक्तम् –

8 श्रीमद्भगवद्गीता-15/15-16
9 कठोपनिषद-1/3/10
10 श्रीमद्भगवद्गीता-3/5
11 श्रीमद्भगवद्गीता-2/47
12 रामचरितमानस-3/42/8-9
13 श्रीमद्भगवद्गीता-2/3
14 श्रीमद्भगवद्गीता-2/15

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जयः |
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योगः उच्यते ||[15]

कर्मयोगसाधकानामपि कृते समत्वयुक्तकर्मकरणे आदेशऽस्ति-

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च |
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ||[16]

एवं सिद्धज्ञानयोगिनः लक्षणेऽपि समत्वं प्रतिपादितमस्ति –

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः |
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ||[17]

उपनिषदि च – "तत्र क: शोक: को मोह: एकत्वमनुपश्यतः" (ईशोपनिषद-7) इत्युक्त्वा समता प्रदर्शिता |
यः निन्दां स्तुतिं समानं पश्यति यः सदैव संतुष्टः, येन सर्वत्र समत्वदर्शनम् क्रियते सः एव भगवतःप्रियभक्तः | भगवता स्वयमुक्तम् –

सम : शत्रौ च मित्रे च तथा मानापमानयोः |
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ||
तुल्यनिन्दास्तुतिर्मौनी संतुष्ट येन केनचित् |
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ||[18]

**मनुष्यजीवने समता** – महापुरुषाः समदर्शिनः भवन्ति |यः मनुष्यः पुर्णज्ञः तस्य दृष्टिः विद्याविनयसम्पन्ने ब्राह्मणे, चण्डाले, गवि, शुनि, गजे च समाना भवति | सः सहृदयः मित्रे, शत्रौ, उदासीने, मध्यस्थे, द्वेष्ये, बन्धुगणे, धर्मात्मनि, पापेषु च समदर्शी | यस्य सर्वभूतेषु समभाव: स भगवतः श्रेष्ठो भक्तः –

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु |
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ||[19]

**मनुष्ये पशुषु च समता -** विद्याविनयसम्पन्ने ब्राह्मणे, सर्वेषु पशुषु चाण्डालादिषु कनिष्ठकर्मकारिषु सर्वेषु समभावं धारयन्ति ते एव प्रकृतपण्डिताः इति | येषां पुरुषाणां मनः समत्वमधिष्ठितमस्ति तैः जीवितावस्थायाम् अखिलं जगत् स्ववशे आनीतम् -

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि |
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ||[20]

अपि च –

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन |
सुखं वा यदि वा दु : खं स योगी परमो मतः ||[21]

अनेन प्रकारेण समाजस्य ऐक्यार्थं गीतायाः समत्वं मूलमन्त्रो विद्यते | भगवता श्रीकृष्णेन अर्जुनं निमित्तं कृत्वा समस्तविश्वस्य कल्याणाय गीतारूपेणमहान्उपदेश : कृत : | तत्रार्जुनस्य मोहजनितो विषाद : मूलकारणं वर्तते | विषादोऽपि सत्सङ्गात् सांसारिकभोगेषु वैराग्यमुत्पाद्य जगत्कल्याणं कर्तुं समर्थः | स्वार्थसाधने धर्मरक्षणे च सङ्घर्षः सृष्टिकालादारभ्य प्रचलति | यत्र मम भावः तत्र स्वार्थः | यत्रस्तु समता तत्र परमार्थता |
यदा समता आगच्छति तत्र परोपकारोऽपि भवति | अष्टादशपुराणेषु व्यासस्य वचनद्वयम् वर्तते- 'परोपकारः पुण्याय पापाय परपीडनमिति |' मनुष्यः स्वार्थं विसर्जयित्वा परोपकारं चिन्तयेत् चेत् एकः शुद्ध-समृद्ध-समाजस्य निर्माणनं कल्पते | गीतादृष्टौ समाजस्य विविधेषु क्षेत्रेषु विविधेषु सिद्धान्तेषु दृढनिश्चयता प्राप्यते | इदं गीतामृतं सुचारुतया अनुशीलनेन व्यावहारिकजीवने वैयक्तिके जीवने सामाजिकजीवने आध्यात्मिके क्षेत्रे राजनैतिकक्षेत्रे पारिवारिके जीवने परमोपयोगिसाधनं भविष्यतीति सदर्थक-समाजनिर्माणाय राष्ट्रहिताय च भवेदिति अस्माकमाशा |

## सन्दर्भग्रन्थ सूची


1. श्रीमद्भगवद्गीता-जगदीशः चन्द्रः घोषः, देवालय लाइब्रेरी, आसामः, चतुर्थसंस्करणम् २००५ ख्रिः।
2. श्रीमद्भगवद्गीता-श्रीमच्छांकरभाष्येण, आनन्दगिरिकृतव्याख्यया च संवलिता तथा अभिनवगुप्ताचार्यव्याख्या, मधुसूदन सरस्वतीस्वामिकृतगूढार्थदीपिकाव्याख्यासहिता, श्रीधर्मदत्तशर्मविरचित गूढार्थतत्त्वालोकेन युता च प्रका निर्णयसागर प्रेस, मुंबई, सन् १९९२


---

[15] श्रीमद्भगवद्गीता-2/48

[16] श्रीमद्भगवद्गीता-12/13

[17] श्रीमद्भगवद्गीता-12/14

[18] श्रीमद्भगवद्गीता-12/18-19

[19] श्रीमद्भगवद्गीता-6/9

[20] श्रीमद्भगवद्गीता-5/18

[21] श्रीमद्भगवद्गीता-6/32

3. श्रीमद्भगवद्गीता - अनन्तप्रसाद त्रिकमलाल वैष्णव: प्रका पाटण, गुजरात, द्वितीयावृत्ति: १९९४
4. श्रीमद्भगवद्गीता- आनन्दभाष्येण अर्थचन्द्रकया टीकया च सहिता, गीतार्थसुधया गुह्यार्थदीपिकया च सहिता, प्रका-स्वामी श्रीबालकृष्णाचार्यः श्रीरामचरितमानस-तुलसीदास, गीता प्रेस.
5. Bhagavad-Gita (Goodhartha Deepika): Madhusudana Sarasvati (Translated into English by Swami Gambhirananda), Advaita Ashrama, Kolkata.
6. Bhagavad-Gita (With the Commentary of Shankaracharya): Swami Gambhirananda, Advaita Ashrama, Kolkata.
7. The Yoga Sutras of Patanjali: http://sanskritdocuments.org/all_pdf/yogasuutra_meaning.pdf.